International Journal of Sanskrit Research 2019; 5(4): 264-269

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 264-269
© 2019 IJSR
www.anantaajournal.com
Received: 07-05-2019
Accepted: 09-06-2019

**जो.वेङ्कटराम शर्मः**
शोधछात्रः, राष्ट्रीय संस्कृत विद्यापीठम्
तिरुपतिः, आंध्र प्रदेश, भारत

Correspondence
**जो.वेङ्कटराम शर्मः**
शोधछात्रः, राष्ट्रीय संस्कृत विद्यापीठम्
तिरुपतिः, आंध्र प्रदेश, भारत

# कविकुलतिलकः कालिदासेनोक्त विद्यारम्भमुहूर्तविचारः

**जो.वेङ्कटराम शर्मः**

विद्यारम्भः इत्युक्ते विद्यस्य आरम्भः इत्यर्थः। विद्या आरम्भःकाले विहितकालादिविचारः अत्रलेखकः विचारः कृतः। शशोः ज्ञानाभिवृद्यर्थं एवं च तत् ज्ञानेन ऐहिकामुष्मिक फलानुभवार्थं विद्या अपेक्षते। एतदर्थं तु प्रथमतया अक्षराभ्यासः कृत्वा तेन भाषाज्ञानादि प्राथमिक ज्ञानर्जनं समुपार्ज्य तदनन्तरं ब्राह्मणादि वर्णानां कृते विहितविद्या अभ्यासः क्रीयन्ते। तेन तेषां जीवितकाले सर्वसुखादिकं संप्राप्य अन्तिमे परमपदं संप्रापनीयः इति धीः।

विविध वर्णानां कृते विविध विद्याविषयकानि लोके वर्तन्ते। वर्णाश्रमादि धर्मानुसारेण विविध-वर्णाश्रयविद्यार्थिनः तेषां कृते प्रतिपादित विद्याभ्यासः सम्यक्तया अधीत्या तेन प्राप्तज्ञानस्य संपूर्णतया उपयुज्ये ज्ञानसमुपार्जनस्य प्रधानहेतुः तु केवलं आनन्दमेव इति पूर्णतया ज्ञात्वा तदानन्दानुभवः प्राप्तव्या इति ज्ञानवृद्धयः धीः इति अस्माभिः आलोच्यते चेत् स्पष्टतया ज्ञायते। अतः एतादृश महत्कार्यसाधने आद्यभागः विद्याभ्यासः। अतः विद्याभ्यासादिकं समीचीनतया करणाय विद्यारम्भ मुहूर्तः अत्यन्ता महता प्राप्यते।

एतादृश महत् कार्यं कथं करणीयं इति विचारः कालिदासः पूर्वकालमृत, ज्योतिर्विदाभरण ग्रन्थयोः मध्ये कृतेविद्यते। विद्यारम्भमुहूर्तविचारः पूर्वकालामृते द्वितियबिन्दै चतुर्दशतमश्लोके कृतो भवति।तद्यथा -शिशोः जननानन्तरं पञ्चमवत्सरे शुभवासरेषु दिवाभागे अष्टमस्थानशुद्धियुतेलग्ने, पक्षद्वयगत प्रतिपत्- रिक्ताष्टमी- षष्ठी-अमावास्यातिथीः विहाय,अनुराधा, रेवती, अश्विनी, हस्त, चित्रा, स्वाती, पुनर्वसु, पुष्य, श्रवणा इत्येषु नक्षत्रेषु चरस्थिरराशिषु सूर्यस्य स्थितिकाले, चरलग्ने गुरशुक्रयोः अस्तमनात्पूर्वम्, उत्तरायणे बालकस्य अक्षरारम्भः कर्तव्यः इति निरूपितम्। अनध्ययनरिक्तातिथीः विहाय, अश्विनी, हस्त, चित्रा, स्वाती, मृगशिरा, आर्द्रा, पुनर्वसु, पुष्य, आश्लेषा, श्रवणा, मूला, उत्तरात्रयं इत्येतेषु नक्षत्रेषु, शाखाधिपः, गुरुः, शुक्रः, बुधः, सोमः सूर्य इत्येषां वासरेषु, चरलग्ने विद्यारम्भः कर्तव्यः इति निगदितम्। अन्याचार्यमते सोमवासरे बुधवासरेच विद्यारम्भः न कर्तव्यः। शस्त्राभ्यासः कुजरविवासरयोः कर्तव्यः इति निरूपितम्।

यतोहि अत्र पूर्वकालामृतकारस्य अभिप्रायेण अक्षरस्वीकारस्तु प्रथमवारं अक्षरारम्भकरण- विधिः तथा विद्यारम्भः अक्षरारम्भानन्तरं प्रथमवारं गुरुसकाशे विद्याध्ययनाय गमनसमयः भवेत् इति दृश्यते।

बालानां शुभवासरेऽह्नि निधने शुद्धेऽक्षरस्वीकृतिः
कार्या पञ्चमवत्सरे प्रतिपदं रिक्ताष्टमी षष्ठ्यमाः।
हित्वा पूष्णि चरे स्थिरे चरगृहे व्यक्ते गुरौ भार्गवे
मित्रान्त्याद्यरवित्रयादितिगुरुश्रोणाषु सौम्यायने।। [1]
विद्यारम्भविधिर्दिवैव शुभदोऽनध्यायरिक्तां विना
दस्रार्कत्रयसोमपञ्चकहरिक्रव्यादपूर्वत्रये
शाखेशार्यकविज्ञसोमदिनकृद्वारेषु लग्ने चरे
नो विद्याबुधसोमयोः परमतं शस्त्रं कुजेऽर्केऽभ्यसेत्।।[2]

विद्यारम्भ समयविचारे विविधग्रन्थेषु एवं उक्तः

उदग्गते भास्वति पञ्चमेऽब्दे
प्राप्तेऽक्षरस्वीकरणं शिशूनाम्। [3]
प्राप्ते तु पञ्चमे वर्षे त्वप्रसुप्ते जनार्दने।
विद्यारम्भस्तु कर्तव्यो यथोक्ततिथिवासरे।। इति [4]
अक्षरस्वीकृतिः प्रोक्ता प्राप्ते पञ्चमहायने। इति[5]
बालस्य पञ्चमे वर्षे प्राप्ते भानौ मृगादिगे।
आरम्भेताक्षरविधिं शुभे काले यथोदिते।। इति [6]
पञ्चमाब्दे नरः कुर्याद्विद्यारम्भं सदा बुधैः।। इति[7]
विद्यारम्भस्तु पञ्चमे। इति [8]
अक्षरस्वीकृतिं वक्ष्ये प्राप्ते पञ्चमहायने।[9]

विद्यारम्भ पक्षविचारेषु एवं विद्यते।

पूर्वपक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिके विना।। इति[10]
पूर्वपक्षः शुभः प्रोक्तः कृष्णे चान्त्यत्रिकं विना।। इति[11]
शुक्लपक्षे प्रशस्तः स्यात्कृष्णपक्षे त्रिधा कृते।
आद्यभागः प्रशस्तः स्यादितरौ वर्जयेत्सदा।।[12]

विद्यारम्भाय तिथिविचारः एवं कृतः।

रिक्ताऽष्टमी पञ्चदशी निषिद्धा। इति [13]
चतुर्दशीं चतुर्थीं च षष्ठीं प्रतिपदं तथा।
अष्टमीन्नवमीं पर्व चाक्षरस्वीकृतौ त्यजेत्।।
शेषास्तु तिथयः सर्वा ह्यक्षरग्रहणे शुभाः।[14]

विद्यारम्भ कालविचारे कालप्रकाशिकायां एवं विद्यते।

पूर्वाह्ने च प्रशस्तः स्यान्मध्याह्ने च विशेषतः।
अपराह्ने च रात्रौ च संध्ययोश्च विवर्जयेत्।।[15]

विद्यारम्भाय लग्नशुद्धिविचारे अष्टमशुद्धिरपेक्षते इति विविधग्रन्थेषु एवं विद्यते।

शुद्धे लग्ने नैधने पुत्रधर्मेकुर्यात्प्राज्ञः सर्वविद्यासमाधिम्।। इति [16]
शुभाः पापाश्च रन्ध्रस्थाः सर्वे नेष्टाः सदा ग्रहाः। इति[17]

---

[1]पूर्वकालामृते द्वितियबिन्दौ 14 श्लोकः
[2]पूर्वकालामृते द्वितियबिन्दौ 15श्लोकः
[3]वसिष्ठःसंहितायां विद्यारम्भमुहूर्तविचारेषु
[4]विश्वामित्रः विद्यारम्भमुहूर्तविचारे
[5]नृसिंहः विद्यारम्भमुहूर्तविचारेषु
[6]विधिरत्ने विद्यारम्भमुहूर्तविचारे
[7]मुहूर्तगणपतौ वद्यारम्भमुहूर्तविचारेषु
[8]दीपिकायाम् विद्यारम्भविचारे
[9]कालप्रकाशिकायां अक्षरस्वीकारविचारेषु 1श्लो
[10]नृसिंहः विद्यारम्भमुहूर्तविचारेषु
[11]मुहूर्तसंग्रहे विद्यारम्भमुहूर्तविचारेषु
[12]कालप्रकाशिका अक्षरस्वीकारमुहूर्तविचारे 3श्लो
[13]वसिष्ठ संहितायां अक्षरस्वीकारविचारे
[14]कालप्रकाशिकायां अक्षरस्वीकारमुहूर्तविचारेषु 4-5
[15]कालप्रकाशिका अक्षरस्वीकारमुहूर्तविचारे 9श्लो
[16]वसिष्ठः विद्यारम्भमुहूर्तविचारे
[17]नृसिंहः विद्यारम्भमुहूर्तविचारेषु

ज्योतिर्विदाभरणे विद्यारम्भमुहूर्तविचारः बहुविस्तरेण प्रतिपादिताः। तत्र च उत्तरायणकाले वेदशाखाधिपस्य, गुरुशुक्रयोश्च अस्तमनात् प्राक् विद्याभिलाषी विद्यारम्भंकुर्यादिति।

शाखापरिवृढपूज्योशनसामुदये ह्युपलब्ध्यै सततं स्यात्।
वागर्थिन इह भाषायशसे विद्यारम्भोऽमरवरदिवसे।।[18]

अयनविचारे अन्ये एवं उक्ताः।

उदग्गते भास्वति पञ्चमेऽब्दे
प्राप्तेऽक्षरस्वीकरणं शिशूनाम्। इति[19]
उत्तरायणगे सूर्ये कुम्भमासं विवर्जयेत्।। इति [20]
उत्तरायणगे सूर्ये कुम्भमासं विवर्जयेत्।। इति [21]
सौम्यायने शुभे मासि स्वाध्यायदिवसे शुभे। इति[22]
उत्तरे त्वयने कुर्यात्कुम्भमासे विवर्जयेत्।।[23]

भद्रादिदुष्टकरणानि, परिघाद्यशुभयोगान्, गलग्रहादिदोषसमयं त्यक्त्वा पक्षद्वये दोषरहिततिथिषु च सकलशास्त्रारम्भेन शास्त्रसिद्धिर्भवति इति।

पक्षद्वितयगताखिलघस्त्रैर्विष्टिकुयोगगलग्रहमुक्तैः।
सन्ततमिह किल विद्यारम्भः सर्वागमकृतसिद्धिप्रदः स्यात्।।[24]

मूलं, पूर्वाषाढा, हस्तं, मृगशिरा, आर्द्रा, चित्रा, पूर्वाभाद्र, आश्लेषा, पूर्वाफल्गुनि इत्येषु नक्षत्रेषु तथा चरलघुसंज्ञकनक्षत्रेषु(इत्युक्ते स्वाती, पुनर्वसु, श्रवणा, धनिष्ठा, शतभिषक्, हस्त, अश्विनी, पुष्य तथा अभिजित् नक्षत्रेषु) सर्वविधविद्यारम्भःशुभः इति प्रतिपादितम्।

विद्यारम्भाय नक्षत्रविचारे अन्ये एवं उक्तवन्तः।

चित्राश्विनीश्रवणवासवपुष्यपौष्ण-
पूर्वात्रयश्वसनदैवतनैरृतानि।
मित्रेन्दुतिग्मकिरणादितिदैवतानि
विद्याविवृद्धिमधिकां जनयन्त्यमूनि।। इति [25]
वैष्णवादित्यतिष्येन्दुश्रविष्ठास्वातिवारुणाः।
मैत्रेन्द्रहस्तचित्राश्च विद्यारम्भेषु पूजिताः।। इति [26]
हस्तादित्यमरुन्मित्रपौष्णचित्राश्विशंकराः।।
वैष्णवञ्चाक्षरे श्रेष्ठाः शेषास्तु परिवर्जिताः।[27]
नक्तञ्चरपुष्करविधुशर्क्षैस्त्वष्टजपत्पन्नगभगभाढ्यैः।
लोललघूडुसमेतैरखिलो विद्यारम्भः
सुमतिभिरुदितः।।[28]

विद्यारम्भाय गुरुबुधशुक्रवासराः समीचीनाः इति पण्डिताः प्रवदन्ति। केचनाचार्याः सोमरविवासरौ च विद्यारम्भाय फलप्रदौ इति।

पर्जन्यार्चितपद्विदुशनसा माहुरहानि वराण्यभिरूपाः।
विद्याया विधुमिहिरदिनेवारम्भे
क्वचिदनसौम्यफलेऽस्मिन्।।[29]

विद्यारम्भाय वासरविचारः अन्यैः एवं प्रतिपादिताः।

दिवसांशोदया वर्ज्या यत्नेन कुजसौरयोः।
श्रेष्ठाः सितज्ञजीवानां मध्यमाश्चन्द्रसूर्ययोः।।

---

[18] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 2श्लोकः

[19]वसिष्ठः अक्षरस्वीकारविचारे

[20]नृसिंहः विद्यारम्भमुहूर्तविचारेषु

[21]मुहूर्तसंग्रहे विद्यारम्भमुहूर्तविचारेषु

[22]मुहूर्तगणपतौ विद्यारम्भमुहूर्तविचारेषु

[23]कालप्रकाशिका विद्यारम्भमुहूर्तविचारे प्रथमश्लोकस्य उत्तरार्धः

[24] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 4श्लोकः

[25]भीमपराक्रमः अक्षरस्वीकारमुहूर्ते

[26]सायणीये विद्यारम्भमुहूर्तविचारे

[27]कालप्रकाशिका विद्यारम्भमुहूर्तविचारेषु 5-6श्लो

[28] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 5श्लोकः

[29] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 6श्लोकः

रविवारे तु पूर्वाह्ने विद्यारम्भो विधीयते।
चन्द्रवारेऽपराह्ने तु विद्या गुर्वी विधीयते।।इति[30]
आचार्यसौम्यकाव्यानां वाराः श्रेष्ठाः शशीनयोः।।
वारो द्वौ मध्यमौ प्रोक्तौ वर्जितौ कुजसौरयोः।
केचिदादित्यवारं च वर्जयन्ति मनीषिणः।। 7।।[31]

विद्यारम्भाय सन्धिनिषेधाः प्रतिपादिताः। उत्तरायणदक्षिणायनसन्धिकाले, सूर्योदयसूर्यास्तमय- सन्धिकाले, गुरोः सवंत्सरसन्धिषु, ऋतुसन्धिषुच विद्यारम्भः निषिद्धः।

सन्धावमरतमिस्त्रादिनयोः सन्धौ मनुजतमिस्त्रादिनयोः।
विद्यारम्भोऽमरगुरुशरदोः सन्धावृत्वोरपि नहि
वरदः।।[32]

सन्धिकालनिषेधविचारे कालप्रकाशिकायां

पूर्वाह्ने च प्रशस्तः स्यान्मध्याह्ने च विशेषतः।
अपराह्ने च रात्रौ च संध्ययोश्च विवर्जयेत्।।9।।[33]

लग्नात् एकादशे, दशमे,नवमे, पञ्चमेवा गुरुबुधशुक्राः भवितव्याः। चरलग्नेविद्यारम्भः शुभप्रदः। कुजः शनिश्च तृतीये, षष्ठेवा भवतः चेत् विद्यारम्भःशुभः। अनन्तरं ब्राह्मणादिसर्ववर्णनां सर्वप्रकार- विद्यारम्भाय मुहूर्ताः प्रतिपादिताः।

संक्रन्दनसचिवे विदिधिष्ण्ये संहननाय नभो वृषधीस्थे।
चञ्चलराश्युदये स तु शस्तोऽथासृजि वांशुभुवि
त्र्यहितस्थे।।[34]

लग्नविचारे अन्यवाक्यानि

विद्यारम्भे द्विस्वभावा विशिष्टा
मध्याः प्रोक्ता ये चरा राशयश्च।। इति [35]
चरस्थिरद्विस्वभावा मध्यमाधमपूजिताः। इति[36]
उत्तमा उभयाः सर्वे मध्यमाश्चरराशयः।
वर्जनीयाः प्रयत्नेन त्वक्षरग्रहणे स्थिराः।। 8।।[37]

गणितशास्त्रारम्भाय

सूर्यबुधवासरेषु उग्रसंज्ञकनक्षत्रेषु(पूर्वात्रय, भरणी, मखा), मूला, कृत्तिका, अश्विनी, आर्द्रा, पुष्य,मृगशिरा, हस्त, रेवती, इत्येषु चरनक्षत्रेषु(स्वाती, पुनर्वसु, श्रवण,धनिष्ठा, शतभिषक्) गणित- शास्त्रारम्भः शुभप्रदः।

द्यूनेतुर्दिनेऽत्रीतजन्माङ्गजाह्नि प्रबुद्धा विदोषे च
गाणित्यमूचुः।
सदारम्भमुग्रर्क्षरक्षोनलक्षैः
सनासत्यशेर्ज्येन्दुभार्कान्त्यलोलैः।।[38]

गलग्रहभद्रातिथिविरहितशुभदिने आरब्धा गणितविद्या अन्यविद्यावा वृद्धिकरी स्यात्। शब्दशास्त्र-आगम-वेदादिप्रारम्भाय गुरुशुक्रसबुधवासराः शुभाः।

गलग्राहभर्गाङ्गजापर्वघस्त्रानशेषेष्वपास्यैतदारम्भ इष्टः।
तथारम्भका वक्ष्यमाणाः समस्ता विशस्ता भवेदेषु घस्त्रेषु
शश्वत्।।[39]

चलक्षिप्रमैत्रनक्षत्रेषु(स्वाती, पुनर्वसु, श्रवणा, धनिष्ठा, शतभिषक्, हस्तं, अश्विनी, पुष्य, अभिजित्, मृगशिरा, रेवती, चित्रा,

---

[30]वसिष्ठः अक्षरस्वीकारविचारे

[31]कालप्रकाशिका अक्षरस्वीकारविचारे6,7श्लो

[32] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 7श्लोकः

[33]कालप्रकाशिकायां विद्यारम्भमुहूर्तविचारे 9,10श्लो

[34] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 9श्लोकः

[35]वसिष्ठः विद्यारम्भमुहूर्तविचारे

[36]बृहस्पतिः विद्यारम्भमुहूर्तविचारेषु

[37]कालप्रकाशिका विद्यारम्भमुहूर्तविचारेषु 8 श्लो

[38] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 11 श्लोकः

[39] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 12 श्लोकः

अनुराधा) आर्द्रानक्षत्रेच एतासां विद्यानां आरम्भःकर्तव्यः। धर्मशास्त्रारम्भश्च एषु नक्षत्रेषु एव कर्तव्यः।

**संख्यादिशास्त्रारम्भाय-**

नयेच्छब्दशास्त्रागमारम्भकालं कृती
शेमुषीशोशनोविद्दिनेषु।
चलक्षिप्रमैत्रोडुशैवाश्रितेषु त्वितो
धर्मशास्त्रादिकारब्धिकालम्।।[40]

पूर्वात्रये, उत्तरात्रये, श्रवणे, धनिष्ठायां,मृदुनक्षत्रेषु(मृगशिरा, रेवती, चित्रा, अनुराधा) क्षिप्रनक्षत्रेषु(हस्त, अस्विनी, पुष्य, अभिजित्) आर्द्रारोहिणीनक्षत्रयोः शुभग्रहवासरेषु सांख्यादिशास्त्रारम्भः विद्यार्थिनः ज्ञानवृद्धिहेतुः भवति।

त्रियुग्मीश्रवोयुग्मभैः सद्ग्रहाणां समारम्भितं सांख्यशास्त्रादिशास्त्रम्।
मृदक्षिप्रशम्भूडुशम्भूडुयुक्तैर्दिनेष्वेव तद्बोधसिद्धिं तनोति।।[41]

**धनुर्विद्यारम्भाय-**

आद्रा-श्रवणा-पूर्वाषाढा-पूर्वाफल्गुनी-अश्विनी-मृगशिरा-रोहिणी-पुष्यः-शतभिषक् इत्येतेषु नक्षत्रेषु हस्तादि-सप्तनक्षत्रेषु शुक्र-रवि-भैमवासरेषु धनुर्विद्यारम्भः शुभफलप्रदः इति विद्वांसः नगदन्ति।

सशर्वाभगाश्वीन्द्वजेज्याम्बुपर्क्षे
शयादिन्दुसारङ्गदृक्सप्तकञ्च।
कवीनारवारानभिज्ञा वदेयुर्धनुर्वेदविद्यासमारम्भकाले।।[42]

**चिकित्सागारुडसर्पविद्यारम्भाय-**

मृदुनक्षत्रेषु (मृगशिरा, रेवती,चित्रा, अनुराधा) क्षिप्रनक्षत्रेषु(हस्त, अश्विनी, पुष्य, अभिजित्) तीक्ष्णनक्षत्रेषु(मूला, ज्येष्ठा, आर्द्रा, अश्लेषा), पुनर्वसु, श्रवणा, धनिष्ठा, शतभिषक् इत्येतेषु नक्षत्रेषु सूर्यचन्द्राङ्गारकवासरेषु चिकित्साविद्याभ्यासः, गारुडकर्म, सर्पविद्या च शुभप्रदाः भवति।

मृदुक्षिप्रतीक्ष्णाख्यलोलोडुवर्गे
तमिस्राभियातीन्द्वसृग्वासरेषु।
सदा दोषविच्छास्त्रविद्या निरैन्द्रे तथारम्भयेद् गारुडं कर्म सर्वम्।।[43]

**नाट्यसंगीतविद्यारम्भाय-**

हस्तं,पुष्यं, पूर्वाफल्गुनी, मृगशिरा, ज्येष्ठा, अनुराधा, उत्तराषाढा, श्रवणा, स्वाती, धनिष्ठा, शतभिषक्, रेवती इत्येषु नक्षत्रेषु शुभग्रहवासरेषु च नाट्यसंगीतविद्याभ्यासारम्भः शुभप्रदःस्यात्।

हरेर्भे च तिष्ये भगर्क्षे हरेर्भे हरेर्भे च मैत्रे च वैश्वे हरेर्भे।
हरेर्भे श्रविष्ठाद्वयेऽन्त्ये सदह्नि
किलारम्भयेन्नाट्यसंगीतशास्त्रम्।।[44]

**शिल्पशास्त्रारम्भाय-**

अनध्ययानि त्यक्त्वाअन्येषुदिनेषु धीरनक्षत्रेषु(उत्तरात्रयं, रोहिणी), चरनक्षत्रेषु(स्वाती, पुनर्वसु, श्रवणा, धनिष्ठा, शतभिषक्) क्षिप्रनक्षत्रेषु(हस्तः, अश्विनी, पुष्यः, अभिजित्) मृगशिरसि, आर्द्रानक्षत्रेच रवि-सोम-बुध-गुरु-शुक्रवासरेषु शिल्पशास्त्राभ्यासस्य प्रारम्भः कर्तव्यः।

धीरधीरेतरक्षिप्रचान्द्रैशवद्धिष्ण्यवागीशविद्धेलिराजद्युगम्।
शिल्पशास्त्रादिविद्यासमारम्भणं
स्यादनध्यायघस्रान्यघस्रेष्वलम्।।[45]

---

[40] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 13 श्लोकः
[41] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 14 श्लोकः
[42] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 15 श्लोकः
[43] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 16 श्लोकः
[44] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 17 श्लोकः
[45]ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 21श्लो

अनध्ययनतिथीः त्यक्त्वा अन्यासु तिथिषु सौरसावनदिनेषु अमावास्या प्रतिपत्तिथीः त्यक्त्वा पक्षद्वयगतसर्वासु तिथिषु वेदमन्त्रारम्भाभ्यासः करणीयः इत्यामनन्ति।

श्रौतमन्त्राननध्यायतिथ्युज्झितै
रंशुमत्सावनाहोभिरारम्भयेत्।
व्याप्तपक्षद्वयेष्वागमोक्तानमा पक्षतिः
प्रोज्झिताशेषघस्त्रेष्वपि।।[46]

एवं प्रकारेण विद्यारम्भ विचारः कालिदासेन कृतोविद्यते।

## परिशीलित ग्रन्थसूची


1) श्री कालिदासप्रणीत ज्योतिर्विदाभरणम्, प्रो.रामचन्द्रपाण्डेयः, मोतीलाल बनार्सीदास, वारणासि 2011
2) श्री कालिदासप्रणीत पूर्वकालामृतम्, प्रो.रामचन्द्रपाण्डेयः, चौखम्बा सुरभारती प्रकाशनम्, वारणासि, 2006
3) धर्मकोशः संस्कारकाण्डः, तृतिय परिछेदे प्रथमभागः, सम्पादकः, लक्ष्मणशास्त्रि जोशी, तर्कतीर्थ, प्रज्ञा पाठशाला मण्डलः, प्रज्ञा प्रेस्, गंगापुरि वायि
4) कालप्रकाशिका, सम्पादकः श्री.यन्, पि.सुब्रमण्ड अय्यर्, येषियन् येड्युकेषनल् सर्वीसेस्, मद्रास् नगरं, 600014, 1991.
5) संस्कारविमर्शः. डा.श्रीमति भगवती सुदेश(धर्मशास्त्र प्रवाचिका), राष्ट्रीयसंसकृतसंस्थानम्, जयपुरिसरः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरः


[46] ज्योतिर्विदाभरणे विद्यारम्भविवेकप्रकरणे 25 श्लोकः